http://www.mpboardonline.com

Serial Number

| **E-807** | Roll No. .................................... |
|---|---|

Higher Secondary Examination (Regular) - 2020

# संस्कृत (विशिष्टम्)
# SANSKRIT (Special)

| Total Questions : **26** | Total Printed Pages : **8** | Time : 3 Hours | Maximum Marks : **100** |
|---|---|---|---|

http://www.mpboardonline.com

http://www.mpboardonline.com

**निर्देशः** – (i) सर्वे प्रश्नाः अनिवार्याः सन्ति ।
(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः ।

1 उचितं विकल्पं चित्वा लिखत : 1×5=5

(क) 'गन्तव्यम्' इत्यस्मिन् पदे प्रत्ययः अस्ति –
(अ) तव्यत् (ब) तव्य
(स) अनीयर् (द) ल्यप्

(ख) तुमुन् प्रत्ययस्य उदाहरणम् अस्ति –
(अ) पठितः (ब) पातुम्
(स) पठित्वा (द) गमतुम्

(ग) 'बाला' इत्यस्मिन् पदे प्रत्ययः अस्ति –
(अ) ङीप् (ब) जाप्
(स) टाप् (द) ङीन्

(घ) अप्राप्यं नाम नेहास्ति ........ व्यवसायिनः ।
(अ) धीरस्य (ब) वीरस्य
(स) रामस्य (द) बालकस्य

(ङ) न नश्यति तमो नाम कृतया .......... ।
(अ) धृतवार्तया (ब) दीपवार्तया
(स) धूमवार्तया (द) वायुवार्तया



http://www.mpboardonline.com

http://www.mpboardonline.com

2 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) अधोलिखितेषु अव्ययं नास्ति –

(अ) सर्वत्र (ब) अधुना

(स) राधा (द) तथा

(ख) अधोलिखितेषु अव्ययम् अस्ति –

(अ) श्वः (ब) अश्वः

(स) गजः (द) फलम्

(ग) 'अद्य सोमवासरः अस्ति,' – अस्मिन् वाक्ये अव्ययम् अस्ति ।

(अ) अद्य (ब) सोमवासरः

(स) अस्ति (द) कोऽपि नास्ति

(घ) 'पश्यति' इत्यस्मिन् पदे लकारः अस्ति –

(अ) लट्लकारः (ब) लोट्लकारः

(स) लृट्लकारः (द) लङ्लकारः

(ङ) 'गमिष्यन्ति' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) कोऽपि नास्ति

3 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) 'सूर्योदयः' इत्यस्य पदस्य सन्धिविच्छेदः अस्ति –

(अ) सूर्य + दयः (ब) सूर्य + उदयः

(स) सूर्यो + दयः (द) सूर्य + दृयः

(ख) 'मनोरथः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) स्वर सन्धिः (ब) व्यञ्जन सन्धिः

(स) विसर्ग सन्धिः (द) पूर्वरूप सन्धिः

(ग) ''पावकः'' इत्यत्र सन्धिः अस्ति –

(अ) दीर्घ सन्धिः (ब) गुण सन्धिः

(स) व्यञ्जन सन्धिः (द) अयादि सन्धिः

(घ) ''पञ्चवटी'' इत्यस्मिन् पदे समासः अस्ति –

(अ) अव्ययीभावः (ब) कर्मधारयः

(स) द्विगुः (द) द्वन्द्वः

(ङ) ''प्रतिदिनम्'' इत्यस्मिन् पदे समासः अस्ति –

(अ) तत्पुरुषः (ब) बहुव्रीहिः

(स) अव्ययीभावः (द) कर्मधारयः



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

4 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) षष्ठी विभक्तेः उदाहरणम् अस्ति –

(अ) रामम् (ब) रामात्

(स) रामस्य (द) रामेषु

(ख) "पित्रा" इत्यस्मिन् पदे विभक्तिः अस्ति –

(अ) प्रथमा (ब) द्वितीया

(स) तृतीया (द) चतुर्थी

(ग) "ज्ञानानि" इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) कोऽपि नास्ति

(घ) "घनश्यामः" इत्यस्मिन् पदे समासः अस्ति –

(अ) कर्मधारयः (ब) द्वन्द्वः

(स) बहुव्रीहिः (द) तत्पुरुषः

(ङ) "लभन्ते" इत्यस्मिन् पदे धातुः अस्ति –

(अ) लभ (ब) लभन्

(स) लभ् (द) लूभ्

http://www.mpboardonline.com

5 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) "कमलम्" इत्यस्य पदस्य पर्यायपदं नास्ति –

(अ) जलजम् (ब) वारिजम्

(स) जलधिः (द) अम्बुजम्

(ख) "समुद्रः" इत्यस्य पदस्य पर्यायपदम् अस्ति –

(अ) वारिधिः (ब) सगरः

(स) सरोवरः (द) वृक्षः

(ग) "जननी" इत्यस्य पदस्य विलोमपदम् अस्ति –

(अ) भ्राता (ब) पितामहः

(स) तात (द) जनकः

(घ) 'बाला रूपवती अस्ति' अस्मिन् वाक्ये विशेषणपदम् अस्ति –

(अ) बाला (ब) रूपवती

(स) अस्ति (द) कोऽपि नास्ति

(ङ) "चतुरः वानरः" इत्यस्मिन् पदे विशेष्यपदम् अस्ति –

(अ) चतुरः (ब) वानरः

http://www.mpboardonline.com



http://www.mpboardonline.com

http://www.mpboardonline.com

6 हास्य रसस्य स्थायिभावं लिखत । 2

अथवा

रौद्र रसस्य स्थायिभावं लिखत ।

7 ''वसन्ततिलका'' छन्दसः लक्षणं लिखत । 2

अथवा

''शिखरिणी'' छन्दसः लक्षणं लिखत ।

8 ''यमक'' अलंकारस्य लक्षणं लिखत । 2

अथवा

''अनुप्रास'' अलंकारस्य लक्षणं लिखत ।

9 एक वाक्येन प्रश्नोत्तराणि लिखत – 2
''आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः'' केनोक्तम् ?

अथवा

अष्टावक्रं दृष्ट्वा सर्वे किं कृतवन्तः ?

10 एक वाक्येन प्रश्नोत्तराणि लिखत – 2
सप्तनदीनां नामानि लिखत ।

अथवा

हिमालयस्य वायुः कैः आसेव्यते ?

11 एक वाक्येन उत्तराणि लिखत – 2
ब्रह्मा किम् उक्तवान् ? http://www.mpboardonline.com

अथवा

कुबेरस्य राजधानी का ?

12 कति पुराणानि सन्ति ? पुराणानि कतिधा विभक्तानि ? 2

अथवा

महाभारतस्य रचना केन कृता ? अस्मिन् काव्ये केषां संघर्षस्य वर्णनम् अस्ति ?

13 महाकवि कालिदासस्य विषये संक्षेपेण लिखत । 2

अथवा

महाकविःपण्डितराजजगन्नाथस्य विषये संक्षेपेण लिखत ।



http://www.mpboardonline.com
http://www.mpboardonline.com
http://www.mpboardonline.com

http://www.mpboardonline.com

**14** युग्ममेलनं कुरुत – (कोऽपि चत्वारः) **4**

| | अ | | ब |
|---|---|---|---|
| (क) | पूर्णमदः | (च) | आतुराणाम् |
| (ख) | औषधम् | (छ) | पूर्णमिदम् |
| (ग) | मुक्ताफलैः | (ज) | कोपः |
| (घ) | दुर्वासाः | (झ) | सिन्धुमन्थनम् |
| (ङ) | सुरासुरैः | (ञ) | नखरन्ध्रमुक्तैः |

**15** अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन संस्कृते लिखत – **4**

(अ) भरतः कस्याः पुत्रः ?

(ब) अभिज्ञानशाकुन्तलं कस्य कृतिः ?

(स) पण्डितसभां कः कृतवान् ?

(द) लोकमतेन सूर्यं कः ग्रसति ?

(य) रथे स्थितः कः प्रविशति ?

**16** प्रदत्तशब्दैः चतुर्णां वाक्यानां रिक्तस्थानपूर्तिं कुरुत – **4**

[विधुः, कुलव्रतं, रागः, लिप्तः, बन्धनस्थाः]

(अ) यत्र ................ स्फुरति लताकिस लयेषु ।

(ब) ................ रात्रीर्यदवात्सीर्गृहे मे ।

(स) राहुणा ................ ग्रस्यते ।

(द) विश्वस्मिन् अन्यः कः ................ पालयिष्यति ।

(य) मोच्यन्तां सर्वे ................ ।

**17** प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत । **4**

**18** अधोलिखितवाक्यानां कथानुसारेण क्रम संयोजनं कुरुत – **4**

(अ) सः एकादश्यां कमपि आहारं न खादति स्म ।

(ब) एकस्यां द्वादश्यां तस्य गृहं मुनिः दुर्वासा आगतवान् ।

(स) द्वादश्यां शास्त्रोक्त क्रमेण खादति स्म ।

(द) राजा अम्बरीषः परमविष्णु भक्तः आसीत् ।

**अथवा**

प्रदत्तैः शब्दैः अनुच्छेदलेखनं कुरुत –

[पण्डितसभां, आसन्, उच्चस्तरीयः, जनकः, समागताः, वादप्रतिवाद, तत्र, वादः]

एकदा महाराजः ............. एकां ............. आहूतवान् । सभार्थं बहवः महान्तः ............. आसन् । ............. कुशलाः अपि तेषु ............. । ............. क्रियमाणः ............. अपि अति ............. आसीत् ।



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

19 अधोलिखित गद्यांशस्य उत्तराणि संस्कृते लिखत – 4

मुनिः रक्षणार्थं शिवस्य समीपं गतवान् । 'एतत् विष्णोः चक्रम् अतः भवतः साहाय्यं कर्तुं न शक्नोमि' इति उक्तवान् । तदनन्तरं मुनिः ब्रह्मणः समीपं गतवान् । ब्रह्मा अपि अस्मिन् विषये अहं न किमपि कर्तुं शक्नोमि इति उक्तवान् ।

(अ) मुनिः रक्षणार्थं कस्य समीपं गतवान् ?

(ब) एतत् विष्णोः चक्रम् अतः कस्य साहाय्यं कर्तुं न शक्नोमि ?

(स) मुनिः कस्य समीपं गतवान् ?

(द) अस्मिन् विषये ब्रह्मा किम् उक्तवान् ?

**अथवा**

भारतीयेतिहासस्य स्वर्णयुगः गुप्तयुगः । तस्य भास्वरतमं रत्नं कालिदासः । तस्य क्रमशः द्वितीयं किन्तु गुणशः अद्वितीयं गीतिकाव्यं मेघदूतं नाम विश्वविश्रुतं वर्तते । अस्य मेघसन्देशोऽपि दाक्षिणात्यं नामास्ति । एतत्काव्यं विरहगीतं विरहसन्देशश्चास्ति । अत्र नायकः विरही यक्षः ।

(अ) भारतीयेतिहासस्य स्वर्णयुगः कः ?

(ब) तस्य भास्वरतमं रत्नं कः ?

(स) कालिदासस्य अद्वितीयं गीतिकाव्यं किं नाम विश्वविश्रुतं वर्तते ?

(द) दाक्षिणात्यं नाम कः अस्ति ?

20 अधोलिखित गद्यांशस्य उत्तराणि संस्कृते लिखत – 4

यदस्मिन् त्रयोवर्णाः पिण्याकश्वेतहरिताः, तेषां पिण्याकवर्णः सर्वतः उपरि, श्वेतो मध्ये, हरितश्च सर्वतोऽधः विद्यते । येषां भावानां प्रतीकं चक्रमुक्तं, प्रायेण तेषामेव इमे वर्णा अपि सन्ति । यथा ऊर्ध्ववर्ती पिण्याकवर्णस्त्यागस्य तपसश्च, मध्यवर्ती श्वेतवर्णः शमसत्याहिंसादिसात्त्विकभावानां, हरितवर्णश्च जीवनस्य विकासस्य प्रगतेश्च बोधकोऽस्ति ।

(अ) राष्ट्रध्वजे कति वर्णाः सन्ति ?

(ब) तेषां सर्वतः उपरि कः वर्णः ?

(स) सर्वतोऽधः कः वर्णः विधते ?

(द) पिण्याकवर्णः कस्य बोधकः अस्ति ?

**अथवा**

कश्चित् कृषकः कदाचित् स्वकीयकृषि – कर्मणे पर्याप्तं जलं नास्ति इति हेतोः स्वक्षेत्रे महान्तं कूपमेकं खातवान् । दैवात् तस्मिन् कूपे पर्याप्तं जलं लब्धमभूत । काचित् मण्डूकी तत्रागत्य कदाचित् अण्डं विसृज्य अगच्छत् । गच्छति काले अण्डात् कोऽपि मण्डूकः लब्धजन्मा अभूत् ।

(अ) कूपमेकं कः खातवान् ?

(ब) कृषकः कुत्र कूपमेकं खातवान् ?

(स) कूपे पर्याप्तं जलं कस्मात् लब्धमभूत ?

(द) तत्रागत्य का कदाचित् अण्डं विसृज्य अगच्छत् ?



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

21 पद्यांशस्य उत्तराणि संस्कृते लिखत – 4

सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु ।
सर्वः कामान् अवाप्नोतु, सर्वः सर्वत्र नन्दतु ॥

(अ) सर्वः कानि तरतु ?
(ब) भद्राणि कः पश्यतु ?
(स) सर्वः कुत्र नन्दतु ?
(द) सर्वः कान् अवाप्नोतु ?

**अथवा**

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥

(अ) केषां संहतिः कार्य साधिका ?
(ब) 'बध्यन्ते' इति पदे किं वचनम् अस्ति ?
(स) गुणत्वमापन्नैः तृणैः के बध्यन्ते ?
(द) 'वस्तूनां' पदे का विभक्तिः ?

http://www.mpboardonline.com
http://www.mpboardonline.com

22 अधोलिखित–पद्यांशस्य उत्तराणि संस्कृते लिखत – 4

अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य,
स्थितः पृथिव्या इव मानदण्डः ॥

(अ) हिमालयः नाम नगाधिराजः कस्यांदिशि अस्ति ?
(ब) पृथिव्याः मानदण्ड इव कः स्थितः ?
(स) देवतात्मा कोऽस्ति ?
(द) 'हिमालयः' पदस्य सन्धिविच्छेदं कृत्वा सन्धेःनाम लिखत ।

**अथवा**

दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥

(अ) विद्यया अलंकृतः सन् कः परिहर्तव्यः ?
(ब) केन भूषितः अपि सर्पः भयंकरः ?
(स) दुर्जनः कया अलङ्कृतः सन् परिहर्तव्यः ?
(द) ''दुर्जनः'' इत्यस्य पदस्य विलोमपदं लिखत ।



http://www.mpboardonline.com

http://www.mpboardonline.com

23 अधोलिखितं–अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – 4

अस्ति गङ्गाकूले कुसुमपुरं नाम नगरम् । तत्रासीत् हरस्वामी नाम तीर्थार्थी कश्चित् तापसः । सः भिक्षाटनो विप्रः गङ्गातीरे कृताश्रमः तपसः समुत्कर्षात् लोकानां विशेषेण गौरवास्पदम् अभूत् । कदाचित् तं भिक्षाविनिर्गतं दूरात् दृष्ट्वा कश्चित् तद्गुणासहिष्णुः खलो जनमध्यात् जगाद – यूयं कच्चित् जानीथ, अयं कीदृग् कपटतापसः ? अनेनैव अमुस्मिन् नगरे सर्वे शिशवो भक्षिताः । सत्यं सच्चरितावलोकेन जनितविद्वेषा दुर्जनाः प्रायेण सतां मिथ्यापवादं ददति ।

(अ) तापसस्य नाम किम् आसीत् ?

(ब) हरस्वामी केषां विशेषेण गौरवास्पदम् अभूत् ?

(स) के सतां मिथ्यापवादं ददति ?

(द) कुसुमपुरं नाम नगरं कुत्र अस्ति ?

24 भ्रमणाय अनुमतिं प्राप्त्यर्थं पितरं प्रति एकं पत्रं संस्कृत भाषायां लिखत । 4

**अथवा**

भ्रातुः पाणिग्रहणसंस्कार विषये स्वमित्रस्य कृते एकं निमंत्रणपत्रम् संस्कृत भाषायां लिखत ।

25 अधोलिखितेषु पंच–अशुद्धकारक वाक्यानां शुद्धिः करणीयाः – 5

(अ) सीता रामस्य सह वनम् अगच्छत् ।

(ब) गणेशं नमः

(स) राजा भिक्षुकं धनं ददाति ।

(द) मोहनः कन्दुकात् खेलति ।

(य) वृक्षात् पत्राणि पतति ।

(र) सीता गीता च पठन्ति ।

26 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – 10

(अ) देशभक्तिः

(ब) अनुशासनम्

(स) भारतीया संस्कृतिः

(द) भारते नारीणां स्थानम् ।

**http://www.mpboardonline.com**
**Whatsapp @ 9300930012**
**Send your old paper & get 10/-**
**अपने पुराने पेपर्स भेजे और 10 रुपये पायें,**
**Paytm or Google Pay से**



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com